२०१. सांख्यदर्शनस्य पञ्चविंशति तत्वानां विभाजनं कथं कृतम् ?
उ.

प्रकृति = कारणम्
विकृतिः = कार्यम्

पञ्चविंशति तत्वानि (२५)

- अविकृतिः → मूलप्रकृतिः (१)
- प्रकृति-विकृतिः → महदादि (८)
- विकारः (विकृतिः) → षोडशकगणः (१६) (पञ्चमहाभूत दस इन्द्रियाँ व मन)
- न प्रकृतिः न विकृतिः → पुरुषः (१)

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ (सांख्यकारिका-३)

भावार्थः- सांख्यदर्शनस्य पञ्चविंशतितत्वानां चतुर्धा वर्गीकरणं कृतम् अस्ति। तत्रैका मूलप्रकृतिः प्रधानरूपा (प्रकृतिः), द्वितीयश्च प्रकृतिविकृतिरूपः महदादि (महत्, अहङ्कार, पञ्चतन्मात्राणि), तृतीयश्च विकृतिरूपः (पञ्चमहाभूत + एकादशेन्द्रियाणि) चतुर्थश्च न प्रकृतिर्न विकृतिरूपः पुरुषः इति।

२०२. सांख्यदर्शनानुसारं 'मूलकारणं' (मूलप्रकृतिः) नाम किम्? व्याख्यायतु।
उ. मूलकारणं नाम यतः कार्यं तु जायते परन्तु स्वयं कस्मात् अपि कार्यं न भवति अर्थात् प्रकृतिरूपेण तिष्ठति। सांख्यदर्शनस्य प्रकृत्या महत्त्वादीनां उत्पत्तिः तु भवति परन्तु स्वयं कस्मादपि नोत्पद्यते। अतः प्रकृतिः कारणरूपेण विद्यते।

२०३. सांख्यदर्शनानुसारं "कार्य-कारणं" (कारण-कार्य) (प्रकृतिः-विकृतिः) नाम किम्? स्पष्टयत।
उ. सांख्यदर्शनस्य सप्त तत्वानि कार्यकारणरूपेण तिष्ठन्ति अर्थात् यदा इमानि तत्वानि प्रकृत्या जायन्ते तदा विकृतिः (कार्यं) भवति परन्तु एतेभ्यः तत्वेभ्यः अन्यानि तत्वानि अपि जायन्ते अतः कारणम् अपि भवति।

२०४. सांख्यदर्शनानुसारं विकृतिः (कार्यं) नाम किम्? व्याख्यायतु।
उ. यः तत्वः स्वयं कस्मादपि उत्पन्नं तु भवति परन्तु स्वयं कमपि

Scanned with CamScanner

नोत्पादयति। सः कार्यं तत् कार्यम् इति उच्यते। यथा - षोडशकः गणः (पञ्चमहाभूत + एकादशेन्द्रियाणि) स्वयं तु प्रकृतिविकृतिभ्यः अर्थात् अहङ्कारेभ्यः उत्पद्यते परञ्च एतस्मात् गणात् कोऽपि उत्पन्नं न भवति।

२०५. सांख्यदर्शनानुसारं 'न प्रकृतिर्न विकृतिः' (न कारण न कार्य) नाम किम्?

उ. 'न प्रकृतिर्न विकृतिः' पुरुषः भवति। अर्थात् पुरुषः एव कार्यकारणरूप-धर्मेण रहितोऽस्ति। सनातन चैतन्यरूपम् अस्ति।

२०६. योगदर्शनस्य प्रथमं सूत्रं किम् अस्ति? अथवा महर्षिपतञ्जलेः प्रतिज्ञावाक्यः किमः अस्ति? ✓

उ. 'अथ योगानुशासनम्' (पा. यो. सू. 1/1) अर्थात् अहं/वयं साधकानां मङ्गलाय अधिकारपूर्वकं वेदादिशास्त्रेणाभिहितं परिभाषितं च, ऋषि-महर्षिभिः उपदिष्ट योगशास्त्रस्य इदानीं आरम्भं कुर्मः/करोमि।

२०७. योगः नाम किम्? ✓

उ. 'योगश्चित्तवृत्तिनिरोधः' (पा. यो. सू. 1/2) अर्थात् चित्तवृत्तीनां निरोध एव योगः इत्यभिधीयते। अन्येषु शब्देषु एवं वक्तुं शक्नुमः यतः चित्तवृत्तीनां ~~बाह्य~~ जगद्भ्यः प्रत्याहरणं कृत्वा मोक्षप्राप्तिकरणाय परमात्मनः ध्यानं एवं योगः इति।

२०८. योगस्य फलं किम् अस्ति? अथवा योगप्रयोजनं किम्? ✓

उ. "तदा द्रष्टुः स्वरूपेऽवस्थानम्" (पा. यो. सू. 1/3) अर्थात् यदा चित्तवृत्तीनां निरोधः जायते तदा द्रष्टुः स्वरूपे स्थितो भवति। येन प्रकारेण शुद्धस्वर्णे अशुद्ध धातुन् मिश्रीकृत्य स्वर्णाभूषणं निर्मायति स्वर्णकारः, परञ्च स्वर्णभूषणस्य यदा परिशोधनं कुर्मः तदा अशुद्धधातवः पृथक् भवति एवञ्च शुद्धस्वर्णः पृथक् भवति अर्थात् शुद्धस्वर्णः प्राप्नोति। सा एव प्रक्रिया योगेऽपि वर्तते येन प्रकृतिः अभ्यासे समस्ततत्त्वानि पृथक् कृत्य शुद्ध आत्मतत्त्वोपलब्धिः भवति। अस्मिन् आत्मा स्वरूपे तिष्ठति सः एव तस्य शुद्धस्वरूपं वर्तते।

२०९. निरुद्धावस्थां विहाय अन्यासु अवस्थासु योगिजनानां वृत्तयः कीदृशी भवति? ✓

"वृत्तिसारूप्यमितरत्र" (पा.यो.सू. 1/4) अर्थात् इतरस्मिन् समये योगीजनानां प्रत्ययः दृष्टुः सदृशो भवति।

२१०. योगदर्शने कति प्रमाणानि स्वीकृतानि? नामानि लिखत। ✓
उ. त्रीणि प्रमाणि। १. प्रत्यक्ष २. अनुमान ३. आगमश्च।
"प्रत्यक्षानुमानाऽऽगमाः प्रमाणानि" (पा.यो.सू. 1/7)

२११. प्रमाण शब्दस्य कोऽभिप्रायः अस्ति? ✓
उ. प्रमीयते अनेन इति प्रमाणम्। प्रमेयस्य सम्यक् ज्ञानाय यानि प्रमाणानि अवलम्बेते तदेव प्रमाणम् इति उच्यते। यतोहि लक्षणं ~~प्रमाणश्चे~~ प्रमाश्चैव ~~वस्तुनः~~ प्रमेयस्य (वस्तुनः) सिद्धिर्भवति।

२१२. प्रत्यक्षप्रमाणं नाम किम्? ✓
उ. "इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्" अर्थात् यानि वस्तुनः ज्ञानं इन्द्रियैः भवति सैव प्रत्यक्षप्रमाणम् इति। यथा - नेत्राभ्याम् दृष्टं पुस्तिका, कर्णाभ्यां श्रुतं गीतं, जिह्वया आस्वादितं भोजनम् नासिकया ग्रहितः गन्धः, त्वक् माध्यमेन स्पर्शानुभवः इति।

२१३. अनुमानप्रमाणं नाम किम्? ✓
उ. "अनुमीयते अनेन प्रमाणेन इत्यनुमानम्" अर्थात् येन प्रमाणेन अप्रत्यक्षीभूत वस्तु दृष्टिगोचरं भवति तद् प्रमाणम् अनुमानप्रमाणनाम्ना ज्ञायते। यथा - धूमं दृष्ट्वा अग्नेः ज्ञानम्। अनु अर्थात् पश्चात्; मानम् अर्थात् प्रमाणम् इति। अन्येषु शब्देषु वक्तुं शक्नुमः यत् प्रत्यक्ष-वस्तुना ज्ञानान्तरम् अप्रत्यक्षीभूत पदार्थस्य ज्ञानं येन प्रमाणेन भवति तदनुमानमिति।

२१४. आगमप्रमाणं नाम किम्? ✓
उ. यस्य वस्तुनः ज्ञानं प्रत्यक्षानुमानप्रमाणाऽऽधारेण न भवति किन्तु तस्य ज्ञानं विद्धिः उक्त वचनै एवञ्च शास्त्राणामाधारेण भवति तत्

Scanned with CamScanner

आगमप्रमाणंम् उच्यते। "आप्तवाक्यं शब्दः उत आप्तोपदेशः शब्दः" सत्यवक्तुः उपदेशवाक्य शब्दप्रमाणं, आगमप्रमाणमित्युच्यते। आचार्य ईश्वरकृष्णानुसारेण आप्तलक्षणं प्रतिपादितं यत् -

स्वकर्मण्यभियुक्तो यो रागद्वेषविवर्जितः।
निर्वैरः पूजितः सद्भिराप्तो ज्ञेयः स तादृशः॥

अर्थात् येन पदार्थस्य निश्चयात्मकं ज्ञानं कृतं तम् आप्तम् इति उच्यते सः आप्तपुरुषः ~~श्रे~~ रागद्वेषरहितो भूत्वा ~~अ~~ अनुभवाधारेण वस्तुनः स्वरूपकथनं करोति अतः तस्य वचनं प्रमाणं भवति।

2.5. योगदर्शनानुसारं 'विपर्यय वृत्तिः' नाम किम्? सूत्रं बिलिख्य व्याख्यां कुरु।

उ. सूत्रं → "विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम्" (पा॰ यो॰ सू॰ 1/8)

अर्थात् यद् वस्तु वास्तविकरूपेण दृश्यते तम् अन्यरूपेण पश्यामश्चेत् तद् ज्ञानम् विपर्यय वृत्तिः उच्यते। यथा - रज्जौ सर्पस्य भानं/ज्ञानं इति। एतद् मिथ्याज्ञानमेव विपर्ययवृत्तिः उच्यते। विपर्ययमेव अविद्या बद्धमः इदमेव समस्तअनर्थपदार्थानां जननी वर्तते।

2.6. 'विकल्पवृत्तिः' नाम किम्?

उ. "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" (पा. यो. सू. 1/9)

अर्थात् वस्तुशून्यं भूत्वापि ~~अखण्ड~~ शब्दज्ञानमात्रेण उत्पन्नं चित्तवृत्तिं विकल्पवृत्तिः उच्यते। यथा- वन्ध्यापुत्रः, आकाशे पुष्पम्, शशकस्य सिंग, गर्दभस्य सिंग इति। एतेन विकल्पवृत्तिना संशयात्मकं ज्ञानं उत्पद्यते।

2.7. 'निद्रावृत्तिः' नाम किम्?

उ. "अभावप्रत्ययालम्बना वृत्तिर्निद्रा" (पा. यो. सू. 1/10) अर्थात् या वृत्तिः जाग्रत, स्वप्नावस्थायां च ~~श्रे~~ अनुभवानां प्रतीतिः कारयति सा एव निद्रावृत्तिः उच्यते। अन्येषु शब्देषु मनुष्यं कस्यापि विषयस्य ज्ञानं न भवति परन्तु ज्ञानाभावस्य प्रतीतिर्भवति यथा- सघननिद्रायां (गहरी निद्रा) मनुष्यम् इदम् ज्ञानं भवति यत् अद्य सघननिद्रा आगतवती एतस्य ज्ञानस्य कारणात् एव इमं वृत्तिः इति उक्तम्।

Scanned with CamScanner

प्र. योगदर्शनानुसारं 'स्मृतिवृत्तिः' किं भवति? व्याख्यायत। ✓
उ. "अनुभूतविषयाऽसम्प्रमोषः स्मृतिः" (पा. यो. सू. 1/11) अर्थात् अनुभूतविषयाणां पुनः स्मरणमेव स्मृतिः उच्यते। इन्द्रियैः मनसा च अनुभूत-विषयाणां संस्कारः चित्ते पतति तेषां कस्यापि निमित्तमाध्यमेन पुनःस्मरणम् उत प्रकटीकरणं एव स्मृतिः इति। ~~संसारे~~ मनुष्यः संसारे स्थित्वा सम्यक् असम्यक्. सामान्यः असामान्यः, आनन्दप्रदं, कटुः, क्रोधं, घृणा इत्यादिभिः भिन्न-भिन्न कर्माणि क्रियते तथा च मनसा चिन्त्यते। एतेषु यस्य सम्यकतया (गहरा) अनुभवः भवति। सः अनुभवः एव संस्कारः उच्यते। एते संस्काराः चित्तमुपरि स्थायीरूपेण पतति येषां प्रभावः जन्मपर्यन्तं भवति यावत् तेषां भोगसमाप्तं न भवति। एते संस्काराः सम्यक्, असम्यक्, मिश्रितञ्च ~~त्रिभिः~~ त्रीभिः व्यक्तिं प्रभावयति। चित्तमुपरि स्थिताः संस्काराः यदा जागर्यते तदा एव 'स्मृतिः' इति कथ्यते।

प्र19. महर्षि व्यासानुसारेण चित्तवृत्तीनां कतिधा विभागं कृतम्? ✓
उ. 'पञ्च'। "क्षिप्तं मूढं विक्षिप्तम् एकाग्रं निरुद्धमिति चित्तभूमयः" अर्थात् क्षिप्तं, मूढं, विक्षिप्तम्, एकाग्रं निरुद्धमिति पञ्च चित्तभूमयः भवन्ति।

प्र20. मूढावस्था नाम किम्? एतस्याः कारणं लक्षणं च स्पष्टयत। ✓
उ. मूढावस्थायां चित्तं यदा इन्द्रियाणां विषये अनुरक्तो भवति तदा साधकः सत्यचिन्तने अयोग्यो भवति एतत् कारणात् सः विवेकरहितकार्येषु संलग्नो भवति इयमेव अवस्था मूढावस्था उच्यते।
कारणं → कामं, क्रोधं, लोभः मोहश्च इति।
लक्षणं → निद्रा, तन्द्रा, भयं, मोहः, आलस्यं दीनतादिषु मनुष्यस्य प्रवृत्तिर्भवति। एतस्यामवस्थायां तमोगुणप्रधानो भवति। रजः सत्वं च अभिभूतो भूत्वा गौणरूपेण तिष्ठति। एषा अवस्था अधममनुष्याणामस्ति।

प्र21. चित्तस्य क्षिप्तावस्था किमस्ति? कारणं लक्षणञ्च लिखत। ✓
उ. यः चित्तः स्वभावतः अत्यन्त अस्थिरोऽस्ति, यस्मिन् ~~चित्ते~~ चित्ते अतीन्द्रियविषयाणां विचाराय यादृक् स्थिरता बौद्धिकश्रमेण आवश्यकता वर्तते तादृक् न भवति येन साधकः विषयोन्मुखी भूत्वा सुखं दुःखञ्च भुङ्क्ते। एतदेव क्षिप्तावस्था अस्ति।
कारणं → रागः-द्वेषम् इत्यादयः

Scanned with CamScanner

जंः धर्माधर्मं, रागविरागं, ज्ञानमज्ञानम्, ऐश्वर्य-अनैश्वर्यं च इत्यादिषु प्रवृत्तिर्भवति। अवस्थायामस्यां रजोगुणस्य प्रधानता भवति। सत्वतमश्च अभिभूतो भूत्वा तिष्ठति। सांसारिक मनुष्याणाम् एतादृशी अवस्था भवति।

२२२. चित्तस्य विक्षिप्तावस्था नाम किम्? कारणं लक्षणं च स्पष्टयत। ✓

उ. विक्षिप्तः अर्थात् यद् क्षिप्ततः विशिष्टं भवति। अधिकतया योगसाधकानाम् चित्तस्य विक्षिप्तावस्था भवति। यस्याम् अवस्थायां कदाचित् चित्तः शान्तो भवति कदाचित् अशान्तः इति। एतदेव विक्षिप्तावस्था अस्ति।

कारणं → कर्मयोगम्

लक्षणं → मुखोपरि प्रसन्नता, श्रद्धा, धैर्य, चैतन्यं, ओजं, दानं, करुणा इत्यादयः सद्गुणाः दृश्यते। अस्यामवस्थायां सत्वगुणस्य प्रधानता भवति। तमोरजश्च अभिभूतो भूत्वा तिष्ठति परञ्च रजोगुणस्य स्वभावात् यदा-कदा चञ्चलः चित्तः विक्षेपोऽपि भवति। एषा एतादृशी अवस्था सामान्यतः विशिष्टमनुष्याणां भवति।

२२३ चित्तस्य एकाग्रावस्था किं भवति? कारणं लक्षणं च स्पष्टयत। ✓

उ. एकाग्रः अर्थात् चित्तस्य लक्ष्योपरि एकाग्रीकरणं। यदा मनुष्यः चतुर्विंशतिः होरासु अधिकांशतः एकाग्रचित्तो भूत्वा तिष्ठति। एतस्यामवस्थायाम् चित्तः निर्मलस्फटिक सदृशो भवति।

कारणं → जिज्ञासायाः प्रवृत्ति निरन्तरम् उत्पद्यते।

लक्षणं → निष्कामकर्मकः, राग-द्वेषः, कामं, क्रोधं, लालसा मोहादिकञ्च रहितो भवति। सत्वगुणस्य प्रधानता भवति। तमोरजश्च अभिभूतो भूत्वा तिष्ठति एतादृशी अवस्था योगीनां भवति एतस्याः अवस्थायाः अन्तिमावस्था विवेकख्यातिः वर्तते। योगीदर्शने एषा अवस्था 'सम्प्रज्ञातसमाधि' उच्यते।

२२४. निरुद्धावस्था नाम किम्? कारणं लक्षणं च स्पष्टयत। ✓

उ. निरुद्धः अर्थात् यदा सर्वेषां वृत्तीनां पूर्णतया स्थगनं भवति एवञ्च विवेक-ख्यात्याः अपि वैराग्यभावो उत्पद्यते तदा या अवस्था भवति सा निरुद्धावस्था उच्यते।

कारणं → स्वाभाविकगुणः।

लक्षणं → यदा योगी सम्प्रज्ञातसमाधौ अपि दोषान् पश्यति एवञ्च तेनोत्पन्नः 'परवैराग्यः' न्यूनं भवति तदा असम्प्रज्ञात समाधिः ईश्वरसाक्षात्कारस्य च उत्पन्ना भवति तथा च योगीः परमानन्दः, सात्विकानन्दश्च भवति। अस्मिन् समये स्वभाविकं अस्वभाविकवृत्तीनाञ्च अभावो भवति। इत्थं स्वरूपस्थितिः उत्पद्यते।

"योगान्तरायः" इत्यस्य कोऽर्थः? ✓

उ. अन्तरायः अर्थात् विघ्नः, विक्षेपश्च। योगान्तरायः - योगे विघ्न विक्षेपाः। चित्ते ये विक्षेपाः जायन्ते ते सर्वे एव अन्तरायाः भवन्ति।

२२६. महर्षिपतञ्जलिना योगसूत्रे कति चित्तान्तरायाः उक्तम्? नामानि लिखत। ✓

उ. नव (९)। "व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः।" (पा.यो.सू. 1/30)

① व्याधि ② स्त्यान ③ संशयः ④ प्रमादः ⑤ आलस्यं ⑥ अविरतिः ⑦ भ्रान्तिदर्शनं ⑧ अलब्धभूमिकत्वं ⑨ अनवस्थितत्वञ्च।

२२७. महर्षिपतञ्जलिना योगसूत्रे चित्तस्य कति उपान्तरायाः उत उपविघ्नाः उक्तं? नामानि लिखत। ✓

उ. पञ्च (५)। "दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः" (पा.यो.सू. 1/31)

① दुःखं ② दौर्मनस्य ③ अङ्गमेजयत्वं ④ श्वासः ⑤ प्रश्वासश्च।

२२८. व्याधि शब्दस्य कोऽर्थः? ✓

उ. धातुः, रसं इन्द्रियाणां च विषमता कारणात् उत्पन्नः ज्वरादिकं रोगाः व्याधिः इत्युच्यते।

"उपद्रवांस्तथा रोगान् हितजीर्णमिताशनात्" (शान्तिपर्व २८८/०८)

२२९. स्त्यान-शब्दस्य कोऽर्थः? स्पष्टयत। ✓

उ. कार्ये कृत्याभावः, चित्तस्य अकर्मण्यता अर्थात् योगसाधनायां सामर्थ्याभावः। इच्छा अस्ति परञ्च कार्ये सामर्थ्याभावः इति।

२३०. "संशयः" इत्यस्य कोऽर्थः? ✓

उ. ~~सन्देहयु~~ सन्देहयुक्तः, भ्रान्तिदर्शनम्, उभयपक्षस्पर्शी विज्ञानम् इति। यथा- अहं योगसाधना कर्तुं शक्नोमि उत न, करिष्यामि परञ्च योगसाधना सिद्धा भविष्यन्ति न वा। एतादृशं संशयात्मकं ज्ञानं 'संशयः' उच्यते।

२३१. 'प्रमादः' नाम किम्? ✓

उ. समाधिः साधनसमूहः भावनायाः अभावः, नियमितकार्येषु शिथिलता (लापरवाही) समाधेः साधनानां अनुष्ठानाभावः इति।

२३२. 'आलस्यं' नाम किम्? ✓

उ. चित्तम् अथवा शरीरस्य स्थूलता कारणात् ध्यानस्य अभावः। शरीरस्य स्थूलता कफादि दोषैः भवति एवञ्च चित्तस्य स्थूलता तमोगुणस्य आधिक्य कारणात् भवति।

Scanned with CamScanner

'अविरतिः' शब्दस्य कोऽर्थः? ✓
उ. विषयेषु तृष्णायाः भावः अर्थात् विषयेन्द्रियसंयोगात् चित्तस्य विषयेषु तृष्णा कारणात् वैराग्याभावः इति।

234. 'भ्रान्तिदर्शनं' शब्दस्य कोऽर्थः? ✓
उ. मिथ्याज्ञानम् (योगसाधनानां तथा च फलस्य मिथ्याज्ञानम्)

235. 'अलब्धभूमिकत्वं' शब्दस्य कोऽभिप्रायः? ✓
उ. किमपि प्रतिबन्धकवशात् समाधि भूमेः अभावः अर्थात् समाधौ गमनाभावः।

236. "अनवस्थितत्वं" शब्दस्य किं तात्पर्यम्? ✓
उ. समाधिभूमिं प्राप्य अपि तस्मिन् चित्तस्य अस्थिरता अर्थात् ध्येयस्य साक्षात्कारः करणात् पूर्वमेव समाधेः न प्रापणम्। उपर्युक्ताः नव अन्तरायाः एकाग्रतां नाशयति एते विघ्नाः चित्तस्य वृत्तिना सह भवन्ति, तेषामभावे न भवन्ति एतत् कारणात् चित्तस्य विक्षेपाः योगमलाः, योगान्तरायाः तथा च योगस्य प्रतिपक्षी उच्यन्ते।

237. 'दुःखम्' इत्यस्य कोऽर्थः? स्पष्टयत। ✓
उ. दुःखं नाम वेदना (पीड़ा)। सः च त्रिविधम् अस्ति आध्यात्मिकं, आधिभौतिकं तथा च आधिदैविकं च इति।

238. "दौर्मनस्य" इत्यस्य कोऽभिप्रायः? ✓
उ. यदा इच्छायाः पूर्तिः न भवति तदा मनसि क्षोभोत्पन्नं भवति सा दौर्मनस्य स्थिति भवति।

239. 'अंगमेजयत्वं' शब्दस्य कोऽर्थः? ✓
उ. शरीराङ्गेषु कम्पनमेव अंगमेजयत्वं। एतदपि योगस्य सहविघ्न अस्ति।

240. 'श्वासः' इत्यस्य कोऽर्थः? ✓
उ. इच्छया विना वायोः नासिकया ग्रहणम्।

241. 'प्रश्वासः' शब्दस्य कोऽर्थः? ✓
उ. इच्छया विना वायोः नासिकया बहिर्निस्सरणम्।

242. महर्षिपतञ्जलिना चित्तस्य प्रसन्नतायै उत चित्तस्य विघ्नानां प्रशमनाय किं-किं उपायं कृतम्। ✓
उ. "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" (पा.यो.सू.1/33)
अर्थात् यः सुखी अस्ति तं प्रति मैत्रीभावः, दुःखी प्रति करुणाभाव

पापात्मनां प्रति प्रसन्नताभावः, तथा च पापीनां प्रति उपेक्षा भावनाया अनुष्ठानेन चित्तः प्रसन्नं निर्मलं च भवति। अन्येषु शब्देषु एवम् अस्ति मत –

(क) मैत्री → सुखीं प्रति मैत्रीभावः स्यातव्यं यतोहि सामान्यतया जनाः सुखीजनं दृष्ट्वा ईर्ष्यां करोति।

(ख) करुणा → दुःखीं प्रति करुणाभावः स्यातव्यं तथा च तेषां स्वक्ष्यानुगुणं सहाय्यं करणीयम्।

(ग) मुदिता → प्रसन्नता। ये जनाः सुष्ठु कार्यं कुर्वन्ति तान् प्रति प्रसन्नताभावं प्रशंसां, प्रोत्साहनं च दातव्यम्।

(घ) उपेक्षा → दुरात्मा अर्थात् यः अन्यान् पीडयति तं प्रति क्रोधंभावनां विधाय उपेक्षा करणीयाः अथवा उदासीनताभावरूपेण स्यातव्यम् अस्माभिः।

२५३. "प्रच्छर्दनविधारणाभ्यां वा प्राणस्य" (पा॰यो॰सू॰ 1/34) सूत्रार्थं स्पष्टयतु।
उ॰ श्वासस्य वारं-वारं बहिः क्षेपणं स्थगनं च अर्थात् रेचकः कुम्भकप्रक्रियया अपि चित्तः शान्तो निर्मलं च भवति।

२५४. "स्वप्ननिद्राज्ञानालम्बनं वा" (पा॰यो॰सू॰ 1/38) सूत्रार्थं स्पष्टी करोतु?
उ॰ स्वप्नालम्बनं तथा च निद्रायां बोधालम्बनेनापि चित्तः शान्तं निर्मलं च भवति।

२५५. महर्षिपतञ्जलिना "चित्तप्रसादनाय वीतरागपुरुषाणां ध्यानं कर्त्तव्यम् इति" कस्मिन् सूत्रे उक्तम्?
उ॰ "वीतरागविषयं वा चित्तम्" (पा॰यो॰सू॰ 1/36) अर्थात् वीतरागपुरुषाणाम् विषयकः चित्तोऽपि स्थिरं भवति अथवा वीतरागः नाम रागः, द्वेषं, आसक्तिः आकाङ्क्षा च इत्यादिनां समाप्तिः।

२५६. महर्षिपतञ्जलिना अन्ते चित्तप्रसादनाय किमुक्तम्?
उ॰ "यथाभिमतध्यानाद्वा" (पा॰यो॰सू॰ 1/39) अर्थात् यथाभिमतं भवति तथा ध्यानं कुर्वन्तु।

२५७. क्रियायोगः नाम किम्?
उ॰ "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" (पा॰यो॰सू॰ 2/1) अर्थात् तपः स्वाध्यायम् ईश्वरप्रणिधानं च सर्वं संयुक्तरूपेण क्रियायोगः उच्यते।

२५८. क्रियायोगस्य अभ्यासः किमर्थं क्रियते?
उ॰ "समाधिभावनार्थः क्लेशतनूकरणार्थश्च" अर्थात् क्रियायोगस्य अभ्यासेन समाधि अवस्थायाः प्राप्तिः तथा च क्लेशानां सूक्ष्मीक्रियते।

Scanned with CamScanner